# Agradevacharyakrita Shriramaprapattih

# શ્રીમદ્ અગ્રદેવાચાર્યકૃતા શ્રીરામપ્રપત્તિઃ

## Document Information

Text title : Agradevacharyakrita Shriramaprapattih

File name : shrIrAmaprapattiHagradevAchArya.itx

Category : raama, rAmAnanda, prapatti

Location : doc_raama

Author : agradevAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીમદ્ અગ્રદેવાચાર્યકૃતા શ્રીરામપ્રપત્તિઃ

સ્વામિન્ તે શેષભૂતોઽહં ભોગ્યસ્તે રક્ષ્ય એવ ચ ।
અકિઞ્ચનોઽનન્યોપાયસ્ત્વત્કૈઙ્કર્યૈકભોગ્યકઃ ॥ ૧॥

અગતિશ્ચાનુકૂલોઽહં પ્રાતિકૂલ્યેન વર્જિતઃ ।
રક્ષિષ્યતીતિ વિશ્વાસી સ્વરક્ષાપ્રાર્થનાયુતઃ ॥ ૨॥

કૃપણોઽહં દયાસિન્ધો સર્વાપાપકરસ્તથા ।
સ્વઞ્ચ સ્વીયઞ્ચ યત્કિઞ્ચિત્ ત્વયિ ન્યસ્યામિ સ્વીકુરુ ॥ ૩॥

ન્યસ્યામ્યકિઞ્ચનઃ શ્રીમન્નાત્મરક્ષાભરં ત્વયિ ।
ત્વત્પ્રાપ્તૌ મે ઉપાયસ્ત્વં કૃપયા ભવ રાઘવ ॥ ૪॥

એતચ્ચરાચરં સર્વં યચ્ચ યાવચ્ચ શ્રૂયતે ।
સર્વમસ્તિ ત્વદીયં હી શ્રુતિભિશ્ચાવગમ્યતે ॥ ૫॥

ન તાદૃશં દૃઢં જ્ઞાનં મયિ સ્વામિન્ પ્રતિષ્ઠિતમ્ ।
ત્વં તુ સર્વં વિજાનાસિ સર્વં વસ્તુ મમેતિ ચ ॥ ૬॥

સંસારસાગરે ભૂમન્ તત્ ત્વદ્વસ્તુનિમજ્જિતમ્ ।
પશ્યસિ ત્વં સમર્થઃ સન્ કારણં કિં વદ પ્રભો ॥ ૭॥

ચેતનાચેતનં સર્વં મદીયં સત્યમસ્તિ વૈ ।
જીવોઽપ્યસૌ મદીયશ્ચેત્યભિમાનાન્નિમજ્જતે ॥ ૮॥

યાવત્સ્વત્વાભિમાનોઽસ્ય તાવત્સંસારસાગરે ।
નિમજ્જિતોભિમાનાન્તે ઘુદ્ધરિષ્યામિ ચેદ્વદ ॥ ૯॥

સત્યમહં મદીયશ્ચ સર્વમન્યત્તવાસ્તિ વૈ ।
તથાપ્યેષોભિમાનો મે હેતુસ્તવ નિયોજનમ્ ॥ ૧૦॥

અહં મદીયઞ્ચેત્યેષો યોઽભિમાનો દુરત્યયઃ ।
ત્વયિ ન્યસ્યામિ તં સ્વામિન્ ત્વદીયં તં હિ સ્વીકુરુ ॥ ૧૧॥

નિર્હેતુકૃપયા સર્વં સ્વીકૃત્ય કરુણાનિધે ।
અહં મમાભિમાનં મે નિખિલં છિન્ધિ મૂલતઃ ॥ ૧૨॥

યદિ નાસ્ત્યાનુકુલ્યાદિર્મયિ સ્વામિન્ યથાર્થતઃ ।
બધ્દ્ધાઞ્જલિપુટં દીનં રક્ષ માં શરણાગતમ્ ॥ ૧૩॥

યથાહં ચ મદીયઞ્ચ ન મે રામસ્ય તત્ત્વતઃ ।
ભાતિ મે હૃદયે સમ્યક્ તથા કુરુ દયાનિધે ॥ ૧૪॥

ત્વન્માયયા મલીમસં હૃદયં નિર્મલં કુરુ ।
યેનાઽહં સંવિજાનામિ ત્વાં ત્વદીયશ્ચ તત્ત્વતઃ ॥ ૧૫॥

ત્વત્કૃપાદૃષ્ટિમાત્રેણ તદ્ધિ સર્વં ભવિષ્યતિ ।
ન વૈ પરિશ્રમઃ કશ્ચિત્ તવ તત્ર દયાનિધે ॥ ૧૬॥

પ્રાર્થયામિ મહાદીનો દીનોદ્ધાર કૃપાનિધે ।
એતદ્દેહાવસાને માં સ્વં પ્રાપય દયાકર ! ॥ ૧૭॥

સ્વદત્તજ્ઞાનદીપેન નાશયાજ્ઞાનજં તમઃ ।
સ્વતત્ત્વજ્ઞાનપૂર્વં માં સ્વાર્થં સ્વમર્પય સ્વયમ્ ॥ ૧૮॥

યાનિ સઞ્ચિતપાપાનિ તાનિ નાશય મે પ્રભો ।
અકૃત્યેષુ પ્રવૃત્તિં મે વારય બુદ્ધિપ્રેરક ॥ ૧૯॥

યથા નિર્મુચ્ય પાપેભ્યસ્ત્વત્પ્રાપ્તેર્યોગ્યતા ભવેત્ ।
મયિ સ્વામિન્ હરે રામ તથા ત્વં માં સ્વયં કુરુ ॥ ૨૦॥

ન મે પાપવિનિર્મોકે નાપિ ત્વત્પ્રાપ્તિસાધને ।
શક્તિસ્તત્ર સમર્થત્વં સ્વપ્રાપ્તેઃ સાધનં ભવ ॥ ૨૧॥

સ્વાગ્રે માં પતિતં દૃષ્ટ્વા શ્રુત્વા ચ પ્રાર્થનામિમામ્ ।
અઙ્ગીચકાર શ્રીરામસ્તદપ્યસ્મીહ નિર્ભરઃ ॥ ૨૨॥

ઇતિ શ્રી અગ્રદેવાચાર્યકૃતા શ્રીરામપ્રપત્તિઃ સમાપ્તા ।

Encoded and proofread by Mrityunjay Pandey

*Agradevacharyakrita Shriramaprapattih*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*